श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६६

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६६

*रासक्रीडायां धर्मोपदेशवर्णनं क्रीडावर्णनं च*

उपयातानां सुदृशां
    कुसुमायुधबाणपातविवशानाम्।
अभिवाञ्छितं विधातुं
    कृतमतिरपि ता जगाथ वाममिव॥ १ ॥

गगनगतं मुनिनिवहं
    श्रावयितुं जगिथ कुलवधूधर्मम्।
धर्म्यं खलु ते वचनं
    कर्म तु नो निर्मलस्य विश्वास्यम्॥ २ ॥

आकर्ण्य ते प्रतीपां
    वाणी मेणीदृशः परं दीनाः।
मा मा करुणासिन्धो
    परित्यजेत्यतिचिरं विलेपुस्ताः॥ ३ ॥

तासां रुदितैर्लपितैः
    करुणाकुलमानसो मुरारे त्वम्।
ताभिस्समं प्रवृत्तो
    यमुनापुलिनेषु काममभिरन्तुम्॥ ४ ॥

चन्द्रकरस्यन्दलस-
    त्सुन्दरयमुनातटान्तवीथीषु।
गोपीजनोत्तरीयै-
    रापादितसंस्तरो न्यषीदस्त्वम्॥ ५ ॥

www.prapatti.com

सुमधुरनर्मालपनैः
    करसङ्ग्रहणैश्च चुम्बनोल्लासैः।
गाढालिङ्गनसङ्गै-
    स्त्वमङ्गनालोकमाकुलीचकृषे॥ ६ ॥

वासोहरणदिने य-
    द्वासोहरणं प्रतिश्रुतं तासाम्।
तदपि विभो रसविवश-
    स्वान्तानां कान्त सुभ्रुवामदधाः॥ ७ ॥

कन्दलितघर्मलेशं
    कुन्दमृदुस्मेरवक्त्रपाथोजम्।
नन्दसुत त्वां त्रिजगत्-
    सुन्दरमुपगूह्य नन्दिता बालाः॥ ८ ॥

विरहेष्वङ्गारमयः
    शृङ्गारमयश्च सङ्गमे हि त्वम्।
नितरामङ्गारमय-
    स्तत्र पुनस्सङ्गमेऽपि चित्रमिदम्॥ ९ ॥

राधातुङ्गपयोधर-
    साधुपरीरम्भलोलुपात्मानम्।
आराधये भवन्तं
    पवनपुराधीश शमय सकलगदान्॥ १० ॥

**********

www.prapatti.com